# झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद् राँची

## प्रथम सावधिक परीक्षा 2021–2022 मॉडल प्रश्नपत्र सेट–3

| कक्षा – 10 | विषय – संस्कृत | समय – 1 घंटा 30 मिनट | पूर्णांक – 40 |
|---|---|---|---|

### खण्ड 'क' अपठित अवबोधनम्

निर्देशः– अधोलिखितं गद्यांश पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत–

भारते षड् ऋतवः भवन्ति। तेषु वसन्तः ऋतुराजः कथ्यते चैत्रे वैशाखे च मासे वसन्तः भवति। वसन्ते द्वौ प्रमुखौ उत्सवौ भवतः– वसन्तोत्सवः होलिकोत्सवः च। वसन्तोत्सवे नराः नार्यश्च सर्वत्र गायन्ति नृत्यन्ति च। होलिकोत्सवः फाल्गुनमासस्य पूर्णिमायां भवति।

1 .भारते कति ऋतवः भवन्ति ?
(क) त्रयः (ख) चत्वारः (ग) पंच (घ) षड्

2. कः ऋतुराजः कथ्यते ?
(क) वसन्तः (ख) ग्रीष्मः (ग) वर्षा (घ) शरद्

3. कदा नराः नार्यश्च गायन्ति नृत्यन्ति च ?
(क) वर्षाऋतौ (ख) वसन्तोत्सवे (ग) वर्षायाम् (घ) ग्रीष्मकाले

4. फाल्गुन मासस्य पूर्णिमायां किं भवति ?
(क) दुर्गापूजा (ख) दीपावली (ग) होलिकोत्सवः (घ) दशहरा

5."पूर्णिमायाम्" इति पदे का विभक्तिः ?
(क) पञ्चमी (ख) षष्ठी (ग) सप्तमी (घ) चतुर्थी

### खण्ड 'ख' पठित अवबोधनम्

निर्देशः– अधोलिखितानां प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखत–

6. "शुचिपर्यावरणम्" इति पाठे कविः कुत्र गन्तुम् इच्छति ?
(क) नगरम् (ख) खलकुलकलरवगुञ्जितवनदेशम् (ग) समुद्रतटम् (घ) ग्रामम्

7. कविः कीदृशं सन्देशं दातुम् इच्छति ?
(क) प्रियसन्देशम् (ख) अप्रियसन्देशम् (ग) धृतसुखसन्देशम् (घ) बालसन्देशम्

8. लतातरूगुल्माः कुत्र न पिष्टाः भवन्तु ?
(क) वृक्षे (ख) निसर्गे (ग) प्रस्तरतले (घ) कामये

9. वाष्पयानमाला किं कुर्वन्ती संधावति ?
(क) ध्वानम् (ख) मलिनम् (ग) जनान् (घ) पशून्

10. राजसिंहः कः आसीत् ?
(क) राजा(ख) राजपुत्रः (ग) अमात्यः (घ) सैनिकः

11. "त्वया अहं हन्तव्यः" इति कः कथयति ?
(क) ऋगालः (ख) सिंहः (ग) राजपुत्रः (घ) राजा

12. "शीघ्रम्" इति पदस्य पर्यायपदं किम् ?
(क) बघ्वा (ख) माम् (ग) दूरात् (घ) सत्वरम्

13. "बध्वा" इति पदस्य विपर्ययपदं किम् ?
(क) मुक्त्वा (ख) यासि (ग) तर्हि (घ) कृत्वा

14. सर्वेषु अपत्येषु जननी कीदृशी भवति ?
(क) निर्दयी (ख) कठोरहृदया (ग) तुल्यवत्सला (घ) सुकोमला

15. "उदारहृदया" इत्यर्थे अस्मिन् पाठे किं पदं प्रयुक्तम् ?
(क) वत्सला (ख) आर्द्रहृदया (ग) कठोरहृदया (घ) तुल्या

16. सुरभिः पुत्रस्य किं दृष्ट्वा रोदिति ?
(क) सुखम् (ख) दैन्यम् (ग) धनम् (घ) निर्धनम्
17. "अनुभवामि" इति क्रियापदस्य कर्तृपदं किम् ?
(क) पुत्रः (ख) माता (ग) पिता (घ) अहम्
18. प्रथमं मनुष्यः कस्य हितैषी भवेत ?
(क) परेषां (ख) सर्वेषां (ग) आत्मनः (घ) कस्यापि न
19. "विरूद्धमपि भोजनम्" अत्र विशेषणपदं किम् ?
(क) विरूद्धमपि (ख) विरूद्धम् (ग) भोजनम् (घ) अपि
20. "आयुः" इति पदस्य पर्यायपदं किम् ?
(क) वयः (ख) देशः (ग) कालः (घ) बलः
21. "पूर्णतया" इति पदस्य विलोमपद् किम् ?
(क) पुम्भिः (ख) हितैषिभिः (ग) अर्धेन (घ) पूर्णरूपेण

## खण्ड 'ग' अनुप्रयुक्त व्याकरणम्

निर्देशः— अधोलिखितेषु वाक्येषु रेखांकितपदानां शुद्धं प्रत्ययं विकल्पेभ्यः चित्वा लिखत—
22. सीता **पठितुं** विद्यालयं गच्छति।
(क) क्त्वा (ख) तुमुन् (ग) ल्यप् (घ) शतृ
23. सः पुस्तकं नीत्वा पठति।
(क) क्त्वा (ख) शतृ (ग) शानच् (घ) क्त
24. रमा गृहं **गच्छन्ती** खेलति।
(क) शानच् (ख) शतृ (ग) तुमुन् (घ) ल्यप्
25. बलिका पुस्तकं **पठितवती**।
(क) क्तवतु (ख) क्त (ग) शतृ (घ) शानच्
26. वीराः युद्धं **विजित्य** गच्छन्ति।
(क) क्त्वा (ख) तुमुन् (ग) ल्यप् (घ) शतृ

निर्देशः— अधोलिखितानां रेखांकितपदानां शुद्धंसन्धिं/विच्छेदं वा विकल्पेभ्यः चित्वा लिखत—
27. **राम्+अनुजः** प्रतिदिनं विद्यालयं गच्छति।
(क) रमानुजः (ख) रामानुजः (ग) रमेनुजः (घ) रमनुजः
28. मन्त्रस्य शुद्धं **उच्चारणं** कुरू।
(क) उत् +चारणम् (ख) उच्.+चारणम् (ग) उच्च.+चारणम् (घ) उच्चा.+रणम्
29. अयं **संसारः** विचित्रः अस्ति।
(क) सत् + सारः (ख) सम्.+ सारः (ग) संस.+ आरः (घ) संसा + रः
30. नारदः **देवर्षिः** कथ्यते।
(क) देव.+ अर्षिः (ख) देवर् + षिः (ग) देव.+ऋषिः (घ) देवा.+ऋषिः
31. नै.+ अकः अभिनयं करोति।
(क) नायकः (ख) नयकः (ग) नयाकः (घ) नायिका

**निर्देशः—** अधोलिखितेषु वाक्येषु रेखांकितपदानां शुद्धं समासं/विग्रहं वा विकल्पेभ्यः चित्वा लिखत —
32. राधा **कृष्णस्य समीपम्** गच्छति।
(क) उपकृष्णः (ख) उपकृष्णा (ग) उपकृष्णम् (घ) अनुकृष्णम्
33. **राज्ञः पुत्रः** आगच्छति।
(क) राजापुत्रः (ख) राजपुत्रः (ग) राज्ञापुत्रः (घ) राजपुत्री
34. इन्द्रः **देवाधिपतिः** अस्ति।
(क) देवान् अधिपतिः (ख) देवाभ्याम् अधिपतिः
(ग)देवात् अधिपतिः (घ) देवानाम् अधिपतिः
35. **रामलक्ष्मणौ** वनं गच्छतः।
(क) राम च लक्ष्मण च (ख) रामः च लक्ष्मणः च
(ग) रामा च लक्ष्मणा च (घ)रामेण च लक्ष्मणेन च

36. इदं स्थानं **<u>निर्मक्षिकम्</u>** अस्ति।
(क) मक्षिकाणाम् सहितम् (ख) मक्षिकाणाम् अभावः
(ग) मक्षिकायुक्तम (घ) मक्षिकेन अभावः

निर्देशः–अधोलिखितवाक्येषु विकल्पेभ्यः शुद्धम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत –

37. वृष्टिः भवति गृहात्–––– मा गच्छ।
(क) विना (ख) बहिः (ग) पुरा (घ) ह्यः

38. जलं ––– जीवनं नास्ति।
(क) बहिः (ख) श्वः (ग) विना (घ) सर्वत्र

39. ––– अहं लिखामि।
(क) श्वः (ख) ह्यः (ग) विना (घ) अधुना

40. ईश्वरः ––– अस्ति।
(क) विना (ख) अथ (ग) सर्वत्र (घ) ह्यः

*******************************************